॥ लिंगतो भद्र मण्डल देवता ॥



रेखा त्वष्टादश प्रोक्ताश्चतुलिंग समुद्भवे ।
कोणेन्दुस्त्रिपदः श्वेतस्त्रिपदैः कृष्ण श्रृंखला ॥१॥
वल्ली सप्तपदा नीला भद्रं रक्तं चतुष्पदम् ।
भद्रपार्श्वे महारुद्रं कृष्णमष्टादशैः पदैः ॥२॥
शिवस्य पार्श्वतो वापीं कुर्यात् पंचपदां सिताम् ।
पदमेकं तथा पीतं भद्रवाप्योस्तु मध्यतः ॥३॥
शिरसि श्रृंखलायाश्च कुर्यात् पीदं पदत्रयम् ।
लिंगानां स्कन्धतः कोष्ठा विंशती रक्तवर्णका ॥४॥
परिधिः पीतवर्णेस्तु पदैः षोडशभिः स्मृता ।
पदैस्तु नवभिः पश्चाद् रक्तं पद्मं सकर्णिकम् ॥५॥

1. ॐ असितांग भैरवाय नमः ।
2. ॐ रूरू भैरवाय नमः ।
3. ॐ चंड भैरवाय नमः ।
4. ॐ क्रोध भैरवाय नमः ।
5. ॐ उन्मत्त भैरवाय नमः ।
6. ॐ कपाल भैरवाय नमः ।
7. ॐ भीषण भैरवाय नमः ।
8. ॐ संहार भैरवाय नमः ।
9. ॐ भवाय नमः ।
10. ॐ सर्वाय नमः ।
11. ॐ पशुपतये नमः ।
12. ॐ ईशानाय नमः ।
13. ॐ रुद्राय नमः ।
14. ॐ उग्राय नमः ।
15. ॐ भीमाय नमः ।
16. ॐ महते नमः ।
17. ॐ अनन्ताय नमः ।
18. ॐ वासुकये नमः ।
19. ॐ तक्षकाय नमः ।
20. ॐ कुलिशाय नमः ।
21. ॐ कर्कोटकाय नमः ।
22. ॐ शंखपालाय नमः ।
23. ॐ कम्बलाय नमः ।
24. ॐ अश्वतराय नमः ।
25. ॐ शूलाय नमः ।
26. ॐ चन्द्रमौलिने नमः ।
27. ॐ चन्द्रमसे नमः ।
28. ॐ वृषभध्वजाय नमः ।
29. ॐ त्रिलोचनाय नमः ।
30. ॐ शक्तिधराय नमः ।
31. ॐ महेश्वराय नमः ।
32. ॐ शुलपाणये नमः ।

- हस्ते अक्षतानादाय मनोजूतिरीति मन्त्रेण असितांग भैरवादि लिंगतो भद्र देवाः सुप्रतिष्ठिता वरदा भवत इति प्रतिष्ठाप्य नाममन्त्रैः रुद्रसुक्तेन वा षोडषोपचारैः सम्पूजयेत् ।

- अष्ट भैरव स्थापना (कृष्ण परिधि के बाहर पूर्व दिशा से)

१. **असितांग भैरवाय (पूर्व)**

ॐ नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः ॥

ॐ भूर्भुवः स्वः असितांग भैरवाय नमः । असितांगभैरवम् आ. स्था. ।

२. **रूरू भैरवाय (अग्नि)**

ॐ श्वित्र आदित्यानामुष्ट्रो घृणीवान् वार्ध्रीनसस्ते मत्या अरण्याय सृमरो रुरू रौद्रः । कवयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः ॥

ॐ भूर्भुवः स्वः रुरु भैरवाय नमः । रुरु भैरवम् आ. स्था. ।

३. **चण्ड भैरवाय (दक्षिण)**

ॐ उग्रं लोहितेन मित्र ७ सौव्रत्येन रुद्रं दौर्व्रत्यनेन्द्रं प्रक्रीडन मरुतो बलेन साध्यान्प्रमुदा । भवस्य कण्ठय ७ रुद्रस्यान्तः पार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥

ॐ भूर्भुवः स्वः चण्ड भैरवाय नमः । चण्ड भैरवम् आ. स्था.

४. **क्रोध भैरवाय (नैर्ऋत्य)**

ॐ इन्द्रस्य क्रोडोदित्यै पाजस्यन् दिशान्जत्रवो दित्यै भसज्जीमूतान् हृदयौपशेनान्तरिक्षं पुरीतता नभ ऽ उदर्येण चक्रवाकौ मतस्नाभ्यान् दिवं वृक्काभ्यां गिरीन् प्लाशिभिरुपलान् प्लीह्ना वल्मीकान् क्लोमभिग्लौंभिर्गुल्मान् हिराभिः स्त्रवन्तीर्ह्रदान् कुक्षिब्भ्या ७ समुद्रमुदरेण वैश्वानरं भस्मना ॥

ॐ भूर्भुवः स्वः क्रोध भैरवाय नमः । क्रोध भैरवम् आ. स्था. ।

५. **उन्मत्त भैरवाय (पश्चिम)**

ॐ उन्नत ऋषभो वामनस्त ऐन्द्रावैष्णवाः उनतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः शुकरूपा वाजिनाः कल्माषा आग्निमारूताः श्यामाः पौष्णाः ॥

ॐ भूर्भुवः स्वः उन्मत्त भैरवाय नमः । उन्मत्त भैरवम् आ. स्था. ।

६. **कपाल भैरवाय (वायव्य)**

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या ऽ उन्नयामि ।
समापो अद्भिरग्मत समोषधीभिरोषधीः ॥

ॐ भूर्भुवः स्वः कपाल भैरवाय नमः । कपाल भैरवम् आ. स्था. ।

७. **भीषण भैरवाय (उत्तर)**

ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ।
सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥

ॐ भूर्भुवः स्वः भीषण भैरवाय नमः । भीषण भैरवम् आ. स्था. ।

८. **संहार भैरवाय (ईशान)**

ॐ नमः शम्भवाय च मयो भवाय च, नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

ॐ भूर्भुवः स्वः संहार भैरवाय नमः । संहार भैरवम् आ. स्था. ।

- भव आदि अष्ट शिवों का स्थापना (कृष्ण परिधि में अष्टभैरव के आगे पूर्व दिशा से)

१. **भवाय नमः (पूर्व)**

ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो, नमो भवाय च रुद्राय च,
नमः शर्वाय च पशुपतये च, नमो नीलग्रीवाय च शितिकण्ठाय च ॥
ॐ भूर्भुवः स्वः भवाय नमः । भवम् आवाहयामि स्थापयामि ।

२. **सर्वाय नमः (अग्नि)**

ॐ अग्निः हृदयेनाशनि ७ हृदयाग्रेण पशुपतिं कृत्स्न हृदयेन भवं यक्ना ।
शर्व मतस्ना भ्यामीशानं मन्युना महादेवमन्तः पर्शव्येनोग्रं देवं वनिष्ठुना
वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥
ॐ भूर्भुवः स्वः सर्वाय नमः । सर्वम् आवाहयामि स्थापयामि ।

३. **पशुपतये नमः (दक्षिण)**

ॐ उग्रं लोहितेन मित्र ७ सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्र प्रक्रीडेन मरुतो बलेन
साध्यान्प्रमुदा । भवस्य कण्ठय ७ रुद्रस्यान्तः पार्श्व्यं महादेवस्य
यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥
ॐ भूर्भुवः स्वः पशुपतये नमः । पशुपतिम् आवाहयामि स्थापयामि ।

४. **ईशानाय नमः (नैर्ऋत्य)**

ॐ तमीशानं जगतस् तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् ।
पूषानो यथा वेदसामसद्वृधे रक्षिता पायर दब्ध स्वस्तये ॥
ॐ भूर्भुवः स्वः ईशानाय नमः । ईशानम् आनाहयामि स्थापयामि ।

५. **रुद्राय नमः (पश्चिम)**

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः । बाहुभ्यामुत ते नमः ॥
ॐ भूर्भुवः स्वः रुद्राय नमः । रुद्रम् आवाहयामि स्थापयामि ।

६. **उग्राय नमः (वायव्य)**

ॐ उग्रश्च भीमश्च, ध्वान्तश्च धुनिश्च ।
सासह्वाँश्चा भियुग्वा च विक्षिपः स्वाहा ॥
ॐ भूर्भुवः स्वः उग्राय नमः । उग्रम् आवाहयामि स्थापयामि ।

७. **भीमाय नमः (उत्तर)**

ॐ वेदाहमेतं पुरुषं महान्त मादित्य वर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥
ॐ भूर्भुवः स्वः भीमाय नमः । भीमम् आवाहयामि स्थापयामि ।

८. **महते नमः (ईशान)**

ॐ मानो महान्त-मुत मानो अर्भकं मान उक्षन्त मुत मान उक्षितम् ।
मानो वधीः पितरं मोत मातरं मानः प्रियास्तनवो रुद्ररीरिषः ॥
ॐ भूर्भुवः स्वः महते नमः । महान्तम् आवाहयामि स्थापयामि ।

- अष्ट कुल नागों की स्थापना (भवादि आठ के बाहर पूर्व दिशा से)

१. **अनन्ताय नमः (पूर्व)**

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः।

ॐ भूर्भुवः स्वः अनन्ताय नमः। अनन्तम् आवाहयामि स्थापयामि।

२. **वासुकये नमः (अग्नि)**

ॐ देहि मे ददामि ते नि मे धेहि नि ते दधे।
निहारं च हरासि मे निहारं निहराणि ते स्वाहा॥

ॐ भूर्भुवः स्वः वासुकये नमः। वासुकिम् आवाहयामि स्थापयामि।

३. **तक्षकाय नमः (दक्षिण)**

ॐ नमस्तक्षभ्यो रथकारेभ्यश्चवो नमो, नमः कुलालेभ्यः कर्मारिभ्यश्चवो नमो, नमो निषादेभ्यः पुंजिष्ठेभ्यश्चवो नमो, नमः श्वनिभ्यो मृगयुभ्यश्चवो नमः॥

ॐ भूर्भुवः स्वः तक्षकाय नमः। तक्षकम् आवाहयामि स्थापयामि।

४. **कुलिशाय नमः (नैर्ऋत्य)**

ॐ पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकु सावित्रो ह ७ सो वातस्य नाक्रो मकरः कुलीपयस्ते कूपारस्य ह्रियै शल्यकः॥

ॐ भूर्भुवः स्वः कुलिशाय नमः। कुलिशम् आवाहयामि स्थापयामि।

५. **कर्कोटकाय नमः (पश्चिम)**

ॐ सोमाय कुलुङ्ग ऽ आरण्योजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिद्वी न्यङ्कुः कक्कटस्ते ऽ नुमत्यै प्रतिश्रुत्कायै चक्रवाकः॥

ॐ भूर्भुवः स्वः कर्कोटकाय नमः। कर्कोटकम् आवाहयामि स्थापयामि।

६. **शंखपालाय नमः (वायव्य)**

ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्। उपयाम गृहीतोऽस्यग्नये त्वा वर्चसऽ एष ते योनिरग्नये त्वा वर्चसे॥

ॐ भूर्भुवः स्वः शंखपालाय नमः। शंखपालम् आवाहयामि स्थापयामि।

७. **कम्बलाय नमः (उत्तर)**

ॐ सीसेन तन्त्रं मनसा मनीषिण ऊर्णा सूत्रेण कवयो वयन्ति। अश्विना यज्ञ ७ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यम्॥

ॐ भूर्भुवः स्वः कम्बलाय नमः। कम्बलम् आवाहयामि स्थापयामि।

८. **अश्वतराय नमः (ईशान)**

ॐ अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीवऽ आग्नेयो रराटे पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्या ७ सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इंद्राय स्वपस्याय वेहद्वैष्णवो वामनः॥

ॐ भूर्भुवः स्वः अश्वतराय नमः। अश्वतरम् आवाहयामि स्थापयामि।

- अष्ट शिव की स्थापना

१. **शूलाय नमः** (ईशानेन्द्र मध्ये) **ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो, नमो भवाय च रुद्राय च ।**
नमः शर्वाय च पशुपतये च, नमो नीलग्रीवाय च शितिकण्ठाय च ॥
ॐ भूर्भुवः स्वः शूलाय नमः । शूलम् आवाहयामि स्थापयामि ।

२. **चन्द्रमौलिने नमः**(इन्द्राग्नि मध्ये) **ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।**
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
ॐ भूर्भुवः स्वः चन्द्रमौलिने नमः । चन्द्रमौलिन् आवाहयामि स्थापयामि ।

३. **चन्द्रमसे नमः**(अग्नि यम मध्ये)**ॐ चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।**
रपि पिशंग बहुलं पुरुस्पृह ७ हरिरेति कनिक्रदत् ॥
ॐ भूर्भुवः स्वः चन्द्रमसे नमः । चन्द्रमसम् आवाहयामि स्थापयामि ।

४. **वृषभध्वजाय नमः** (यम नैर्ऋत्य मध्ये) **ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनां ।**
संक्रन्दनो निमिष एकवीरः शत ७ सेना अजयत्साकमिंद्रः ॥
ॐ भूर्भुवः स्वः वृषभध्वजाय नमः । वृषभध्वजम् आवाहयामि स्थापयामि ।

५. **त्रिलोचनाय नमः** (नैर्ऋत्य वरुण मध्ये) **ॐ सुगा वो देवाः सदना अकर्म य आजग्मेद ७ सवनं जुषाणाः ।**
भरमाणा वहमाना हवी ७ ष्यस्मे धत वसवो वसूनि स्वाहा ॥
ॐ भूर्भुवः स्वः त्रिलोचनाय नमः । त्रिलोचनम् आवाहयामि स्थापयामि ।

६. **शक्तिधराय नमः** (वरुण वायु मध्ये) **ॐ रुद्राः स ७ सृज्य पृथिवीं बृहज्ज्योतिः समीधिरे ।**
तेषां भानुरजस्र ऽइच्छुक्रो देवेषु रोचते ॥
ॐ भूर्भुवः स्वः शक्तिधराय नमः । शक्तिधरम् आवाहयामि स्थापयामि ।

७. **महेश्वराय नमः** (वायु सोम मध्ये) **ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।**
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
ॐ भूर्भुवः स्वः महेश्वराय नमः । महेश्वरम् आवाहयामि स्थापयामि ।

८. **शुलपाणये नमः** (सोम इशान मध्ये) **ॐ या वां कशा मधुमत्यश्विना सूनृतावती ।**
तया यज्ञं मिमिक्षतम् ॥
ॐ भूर्भुवः स्वः शूलपाणये नमः । शूलपाणम् आवाहयामि स्थापयामि ।

॥ इति लिंगतोभद्र मण्डल देवता स्थापनम् पूजनम् समाप्तम् ॥